कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ प्रथम काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददेऽभ्रिरसि नारिरसि परिलिखितगं् रक्षः परिलिखिता अरातय इदमहगं् रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपि कृन्तामि दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धतां लोकः पितृषदनो यवोऽसि यवयास्मद्द्वेषो [१] यवयारातीः पितृणागं् सदनमस्युद्दिवग्ग् स्तभानाऽऽन्तरिक्षं पृण पृथिवीं दृगं्ह द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणा ब्रह्मवनिं त्वा क्षत्रवनिगं् सुप्रजावनिगं् रायस्पोषवनिं पर्यूहामि ब्रह्म दृगं्ह क्षत्रं दृगं्ह प्रजां दृगं्ह रायस्पोषं दृगं्ह घृतेन द्यावापृथिवी आ पृणेथामिन्द्रस्य सदोऽसि विश्वजनस्य छाया परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतो वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमस्यैन्द्रमसीन्द्राय त्वा॥[२]

द्वेष इमा अष्टादशच॥1.3.1॥

रक्षोहणो वलगहनो वैष्णवान् खनामीदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेदमेनमधरं करोमि यो नः समानो योऽसमानोऽरातीयति गायत्रेण छन्दसाऽवबाढो वलगः किमत्र भद्रं तन्नौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणागं् हन्ता [३] रक्षोहणो

वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वलगहनोऽव नयामि वैष्णवान् यवोऽसि यवयाऽस्मद्द्वेषो यवयाऽराती रक्षोहणो वलगहनोऽव स्तृणामि वैष्णवान् रक्षोहणो वलगहनोऽभि जुहोमि वैष्णवान् रक्षोहणौ वलगहनावुप दधामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी रक्षोहणौ वलगहनौ परि स्तृणामि वैष्णवी रक्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वद॥[४]

हन्तेन्द्राय द्वे च॥1.3.2॥

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोऽसि प्रचेता स्तुथोऽसि विश्ववेदा उशिगसि कविरङ्गारिरसि बम्भारिरवस्युरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः सम्राडसि कृशानुः परिषद्योऽसि पवमानः प्रतक्वाऽसि नभस्वानसंमृष्टोऽसि हव्यसूद ऋतधामाऽसि सुवर्ज्योतिर्ब्रह्मज्योतिरसि सुवर्धामाऽजोऽस्येकपादहिरसि बुध्नियो रौद्रेणाऽनीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥[५]

अनीकेनाऽष्टौ च॥1.3.3॥

त्वग्ं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्ताऽसि वरूथग्ग् स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहाऽयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्। अयग्ं शत्रूञ्जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ॥ उरु विष्णो वि क्रमस्वोरु क्षयाय नः कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर॥ सोमो जिगाति गातुवि- [६] द्देवानामेति निष्कृतमृतस्य योनिमासदमदित्याः सदोऽस्यदित्याः सद आ सीदैष वो देव सवितः सोमस्तग्ं रक्षध्वं मा वो दभदेतत्त्वग्ं सोम देवो देवानुपाऽगा इदमहं

मनुष्यो मनुष्यान्सह प्रजया सह रायस्पोषेण नमो देवेभ्यः स्वधा पितृभ्य इदमहं निर्वरुणस्य पाशाथ्सुवरभि [७] वि ख्येषं वैश्वानरं ज्योतिरऽग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूस्त्वय्यभूदियग्ं सा मयि या तव तनूर्मय्यभूदेषा सा त्वयि यथायथं नौ व्रतपते व्रतिनोर्व्रतानि॥[८]

गातुविदभ्येकत्रिग्ंशच्च॥1.3.4॥

अत्यन्यानगां नान्यानुपाऽगामर्वाक्त्वा परैरविदं परोऽवरैस्तं त्वा जुषे वैष्णवं देवयज्यायै देवस्त्वा सविता मध्वाऽनक्त्वोषधे त्रायस्वैनग्ग् स्वधिते मैनग्ं हिग्ंसीर्दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिग्ंसीः पृथिव्या सं भव वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयग्ं रुहेम यं त्वाऽयग्ग् स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायाऽच्छिन्नो रायः सुवीरः॥[९]

यंदशच॥1.3.5॥

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा शुन्धतां लोकः पितृषदनो यवोऽसि यवयाऽस्मद्द्वेषो यवयाऽरातीः पितृणाग्ं सदनमसि स्वावेशोऽस्यग्रेगा नेतृणां वनस्पतिरधि त्वा स्थास्यति तस्य वित्ताद्देवस्त्वा सविता मध्वाऽनक्तु सुपिप्पलाभ्यस्त्वौषधीभ्य उद्दिवग्ग् स्तभानान्तरिक्षं पृण पृथिवीमुपरेण दृग्ंह ते ते धामान्युश्मसी [१०] गमध्ये गावो यत्र भूरिशृङ्गा अयासः। अत्राऽह तदुरुगायस्य विष्णोः परमं पदमव भाति भूरेः॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा॥ तद्विष्णोः परमं पदग्ं सदा पश्यन्ति सूरयः। दिवीव

चक्षुरातत्तम्॥ ब्रह्मवनिं त्वा क्षत्रवनिग्ं सुप्रजावनिग्ं रायस्पोषवनिं पर्यूहामि ब्रह्म दृग्ंह क्षत्रं दृग्ंह प्रजां दृग्ंह रायस्पोषं दृग्ंह परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमग्ं रायस्पोषो यजमानं मनुष्या अन्तरिक्षस्य त्वा सानाववं गूहामि॥[११]

उश्मसीपोषमेकान्न विग्ंशतिश्च॥1.3.6॥

इषे त्वोपवीरस्युपो देवान् दैवीर्विशः प्रागुर्वह्वीरुशिजो बृहस्पते धारया वसूनि हव्या ते स्वदन्तां देव त्वष्टर्वसु रण्व रेवती रमध्वमग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि पुरूरवा घृतेनाऽक्ते वृषणं दधाथां गायत्रं छन्दोऽनु प्र जायस्व त्रैष्टुभं जागतं छन्दोऽनु प्र जायस्व भवतं [१२] नः समनसौ समोकसावरेपसौ। मा यज्ञग्ं हिग्ंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। स्वाहाकृत्य ब्रह्मणा ते जुहोमि मा देवानां मिथुया कर्भागधेयम्॥[१३]

भवतमेकत्रिग्ंशच्च॥1.3.7॥

आ दद ऋतस्य त्वा देवहविः पाशेनाऽऽ रभे धर्षा मानुषानद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यपां पेरुरसि स्वात्तं चित्सदेवग्ं हव्यमापो देवीः स्वदतैनग्ं सं ते प्राणो वायुना गच्छताग्ं सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा घृतेनाऽक्तौ पशुं त्रायेथाग्ं रेवतीर्यज्ञपतिं प्रियधाऽऽ विशतोरो अन्तरिक्ष सजूर्देवेन [१४] वातेनाऽस्य हविषस्त्मना यज समस्य तनुवा भव वर्षीयो वर्षीयसि यज्ञे यज्ञपतिं धाः पृथिव्याः संपृचः पाहि नमस्त आतानाऽनर्वा प्रेहि घृतस्य कुल्यामनु सह प्रजया सह

रायस्पोषेणाऽऽपो देवीः शुद्धायुवः शुद्धा यूयं देवागं् ऊढ्वगं् शुद्धा वयं परिविष्टाः परिवेष्टारो वो भूयास्म॥[१५]

देवेन चतुश्चत्वारिगं्शच्च॥1.3.8॥

वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायतागं् श्रोत्रं त आ प्यायतां या ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत्ते क्रूरं यदास्थितं तत्त आ प्यायतां तत्त एतेन शुन्धतां नाभिस्त आ प्यायतां पायुस्त आ प्यायतागं् शुद्धाश्चरित्राः शमद्भ्यः [१६] शमोषधीभ्यः शं पृथिव्यै शमहोभ्यामोषधे त्रायस्वैनग्ग् स्वधिते मैनगं् हिग्ंसी रक्षसां भागोऽसीदमहगं् रक्षोऽधमं तमो नयामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमेनमधमं तमो नयामीषे त्वा घृतेन द्यावापृथिवी प्रोण्वाथामच्छिन्नो रायः सुवीर उर्वन्तरिक्षमन्विहि वायो वीहि स्तोकानागं् स्वाहोर्ध्वनभसं मारुतं गच्छतम्॥[१७]

अद्भ्यो वीहि पञ्च च॥1.3.9॥

सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवथ्स्वाहैन्द्रः प्राणो अङ्गेअङ्गे नि देध्यदैन्द्रोऽपानो अङ्गेअङ्गे वि बोभुवद्देव त्वष्टर्भूरि ते सग्ंसमेतु विषुरूपा यथ्सलक्ष्माणो भवथ देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु श्रीरस्यग्निस्त्वा श्रीणात्वापः समरिणन्वातस्य [१८] त्वा ध्रज्यै पूष्णो रग्ग्ह्या अपामोषधीनागं् रोहिष्यै घृतं घृतपावानः पिबत वसां वसापावानः पिबताऽन्तरिक्षस्य हविरसि स्वाहा त्वान्तरिक्षाय दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः॥[१९]

वातस्याष्टाविग्ं शतिश्च॥1.3.10॥

समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवग्ं सवितारं गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा सोमं गच्छ स्वाहा यज्ञं गच्छ स्वाहा छन्दाग्ंसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहाऽग्निं वैश्वानरं गच्छ स्वाहाऽद्भ्यस्त्वौषधीभ्यो मनो मे हार्दि यच्छ तनूं त्वचं पुत्रं नप्तारमशीय शुगसि तमभिशोच योऽस्मान्द्वेष्टि यं च वयं द्विष्मो धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च॥[२०]

असि षड्विग्ं शतिश्च॥1.3.11॥

हविष्मतीरिमा आपो हविष्मान्देवो अध्वरो हविष्माग्ं आविवासति हविष्माग्ं अस्तु सूर्यः॥ अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेन्द्राग्नियोर्भागधेयीः स्थ मित्रावरुणयोर्भागधेयीः स्थ विश्वेषां देवानां भागधेयीः स्थ यज्ञे जागृत॥[२१]

हविष्मतीश्चतुस्त्रिग्ं शत्॥1.3.12॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्ध्वमिममध्वरं कृधि दिवि देवेषु होत्रा यच्छ सोम राजन्नेह्यव रोह मा भेर्मा सं विक्था मा त्वा हिग्ंसिषं प्रजास्त्वमुपावरोह प्रजास्त्वामुपावरोहन्तु शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः। शृणोत ग्रावाणो विदुषो नु [२२] यज्ञग्ं शृणोतु देवः सविता हवं मे। देवीरापो अपां

नपाद्य ऊर्मिर् हविष्य इन्द्रियावान् मदिन्तमस्तं देवेभ्यो देवत्रा धत्त शुक्रग्ं शुक्रपेभ्यो येषां भागः स्थ स्वाहा कार्षिरस्यपापां मृध्रग्ं समुद्रस्य वोऽक्षित्या उन्नये। यमऽग्ने पृथ्सु मर्त्यमावो वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः॥[२३]

नु सप्तचत्वारिग्ंशच्च॥1.3.13॥

त्वमऽग्ने रुद्रो असुरो महो दिवस्त्वग्ं शर्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नु त्मना॥ आ वो राजानमध्वरस्य रुद्रग्ं होतारग्ं सत्ययजग्ं रोदस्योः। अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम्॥ अग्निर्होता नि षसादा यजीयानुपस्थे मातुः सुरभावु लोके। युवा कविः पुरुनिष्ठ [२४] ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः॥ साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम्। स आयुराऽगाथ्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य॥ अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥ त्वे वसूनि पुर्वणीक [२५] होतर्दोषा वस्तोरेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मिन्थ्सग्ं सौभगानि दधिरे पावके॥ तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे॥ अश्याम तं काममऽग्ने तवोत्यश्याम रयिग्ं रयिवः सुवीरम्। अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते॥ श्रेष्ठं यविष्ठ भारताऽग्ने द्युमन्तमा भर।[२६] वसो पुरुस्पृहग्ं रयिम्॥ स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः। यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन्न्॥ आयुष्टे विश्वतो दधदयमग्निर् वरेण्यः। पुनस्ते प्राण आऽयति परा यक्ष्मग्ं सुवामि ते॥ आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको

घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि [२७] रक्षतादिमम्॥ तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्॥ दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः॥ शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे। त्वं घृतेभिराहुतः॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभि [२८] यदेनं द्यौरजनयथ्सुरेताः॥ आ यदिषे नृपतिं तेज आनट्छुचि रेतो निषिक्तं द्यौरभीके। अग्निः शर्धमनवद्यं युवानग्ग् स्वाधियं जनयथ्सूदयच्च॥ स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः॥ अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम्। विश्वा य [२९] श्चर्षणीरभ्यासा वाजेषु सासहत्॥ तमऽग्ने पृतनासहग्ं रयिग्ं सहस्व आ भर। त्वग्ं हि सत्यो अद्भुतो दाता वाजस्य गोमतः॥ उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाऽग्नये॥ वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाऽज्मान्नम्। स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः॥ अग्न आयूग्ंषि [३०] पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधत्पोषग्ं रयिं मयि॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् वक्षि यक्षि च॥ स नः पावक दीदिवोऽग्ने देवाग्ं इहाऽऽवह। उप यज्ञग्ं हविश्च नः॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुची रोचत आहुतः॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीग्ंष्यर्चयः॥[३१]

॥14॥

पुरुनिष्ठः पुर्वणीक भराभि वयोभिर्य आयूग्ंषि विप्रः शुचिश्चतुर्दश च॥1.3.14॥

देवस्य रक्षोहणो विभूस्त्वग्ं सोमाऽत्यन्यानगाँ पृथिव्या इषे त्वाऽददे वाके सं ते समुद्रग्ं हविष्मतीर् हृदे त्वमग्ने रुद्रश्चतुर्दश॥1.3.14॥

देवस्य गमध्यै हविष्मतीः पवस एकत्रिग्ंशत्॥31॥

देवस्याऽर्चयः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति प्रथमकाण्डे तृतीयः प्रश्नः॥